# रघुवंशमहाकाव्ये आचारशास्त्रीयानुशीलनम्

**Susmita Sahoo**
M.A in Sanskrit
Vidyasagar University, Midnapore, West Bengal, India
Email: susmitasahoo13061996@gmail.com

Abstract: भारतीयसंस्कृतौ वहुप्राचीनकालादारभ्यः आचारस्य महत्त्वं विद्यते। 'आचारः परमो धर्मः' इति नीतिमेव भारतीयाः श्रेष्ठधर्मरूपेण स्वीकुर्वन्ति। अपिच धर्मस्य तृतीयप्रमाणरूपेण आचारस्य महत्त्वमतीवगुरुत्वपूर्णम्। वेदेषु, उपनिषत्सु, सर्वासु स्मृतिषु, सर्वेषु धर्मसूत्रेषु च आचारविषये प्रतिपादितमस्ति। श्रुतिस्मृतिप्रोक्तं शास्त्रीयाचरणम् आचारमिति कथ्यते। व्याकरणदृष्ट्या आचारशब्दः आङ् उपसर्गपूर्वकं चर् धातोः भावार्थे घञ् प्रत्ययकृते सति निष्पत्तिर्भवति, अथवा 'आचरति एनम् अनेन इति वा' इत्यर्थे आचारशब्दः निष्पद्यते। आचारस्य पर्यायरूपेण धर्मः, नीतिः, कर्तव्यश्चेति शब्दाः प्रयुज्यन्ते। आचारशब्दः सदाचारस्य द्योतको भवति। आचारेण एव समाजस्य स्थापनं, विकासः व्यक्तेः समाजस्य च चारित्रिकबलस्योन्नतिः सम्भवेदिति। अतएव आचारपरिपालनमेव भारतीयधर्मस्य परमं वैशिष्ट्यम्। आचारशास्त्रविषयकाः चर्चाः न केवलं धर्मशास्त्रीयनिवन्धग्रन्थेषु सीमावद्धाः सन्ति अपितु लौकिक– संस्कृतसाहित्यग्रन्थेष्वपि संस्कृतमहाकवयः नाट्यकाराश्च तेषु रचनासु एषा चर्चाः कृताः सन्ति। संस्कृतसाहित्याकाशे कविकुलगुरुकालिदासस्य स्तानमतीवमहत्त्वपूर्णम्। तस्य विरचिताः ग्रन्थाः जनहृदये सदा विलासिताः सन्ति। महाकविकालिदासेन शास्त्रविहिताचारपद्धतिम् आचरणस्य महत्त्वपूर्णमङ्गमिति मन्यते। तस्यानुसारं मनुष्यस्य सर्वाङ्गीन विकासः शास्त्रानुकूलाचारपालनेन एव सम्भवति। तस्य रचनासु सर्वत्र प्रतिपदं शास्त्रानुकूलाचाराणां चर्चाः दृक्गोचरी भवन्ति। अतः कविकूलगुरोः कालिदासस्य अनुपम साहित्यकृतिः रघुवंशमिति ऊनविंशतिसर्गात्मके महाकाव्ये प्रतिपादिताः सामाजिक–राजनैतिक–आर्थिक–धार्मिक–नैतिक श्चेत्यादयः आचारविषयाः अस्मिन् प्रवन्धे समासेन आलोच्यन्ते।

Keywords: रघुवंशम्, कालिदासः, आचारः, सदाचारः, धर्मः, शास्त्रम्।

**उपक्रमः**— भारतीयवाङ्मये आचारशास्त्रशब्दः विशिष्टार्थं व्याख्यायते। आचारशब्दः आङ् उपसर्गपूर्वकं चर् धातोः भावार्थे घञ् प्रत्ययकृते सति निष्पत्तिर्भवति अथवा 'आचरति एणम् अनेन इति वा' इत्यर्थे आचारशब्दः निष्पद्यते। अपिच शास्त्रशब्दः शास् धातोः ष्ट्रन् प्रत्ययकृते सति निष्पत्तिर्भवति। शासनात् शंसनात् वा शास्त्रम् अथवा 'शिष्यते अनेन इति शास्त्रम्' इति व्युत्पत्त्याः शास्त्रशब्दः निष्पन्नः। अतएव शास्त्रं हि हितानुशासनशासनग्रन्थः, अहितं प्रतिषिध्य हितं व्यवस्थापयति इति। आचारशास्त्रोऽयं धर्मस्यानुशासनं प्रदर्शयति। धर्मस्य क्रियात्मकरूपं भवति आचारः। कोशग्रन्थेष्वपि आचारस्यार्थः निहितमस्ति। संस्कृतस्य सुप्रसिद्धः शब्दकोशः इत्यत्र आचारस्यार्थः एवमुद्धृतम् —

"आचारः पुं (आ+चर्+भावे घञ्)
सदाचारः पुं (सतां साधुनामाचारः) साधूनामाचरणम्"॥[1]

अपिच 'वाचस्पत्यम्' इति बृहत्संस्कृताभिधाने आचारस्यार्थं एवमुक्तम् —

"आचारः पुं, आ+चर्+भावे घञ्।
आचरणे अनुष्ठाने स च अनुष्ठान निवृत्यात्मकभावाभावरुपः
यत्र सदाचारः वेदस्मृत्यादिविहितः तत्र नित्यानिषिद्धश्च
कदाचर: इति भेदात् द्विविधः" ॥[2]

एतेन स्पष्टं भवति यत् आचारस्य सम्बन्धो आचरणेन व्यवहारेण वा साकमन्वितोऽस्ति। श्रुतिस्मृत्यादिविहितशास्त्रीयाचरणम् आचारः सदाचारः वा तद्विपरीतं शास्त्रनिषिद्धाचरणमनाचारः कदाचारः वा इति कथ्यते। आचारस्य लक्षणप्रसङ्गे महर्षिमनुना मनुस्मृतौ यदुक्तम् —

"यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
वर्णानां सान्तरलानां स सदाचार उच्यते" ॥[3]

सतामाचारः सदाचारः अर्थात् शिष्टानामाचारानामनुसरणं सदाचारः तथैव शिष्टाचारयुक्तमानव: सदाचारी इत्युच्यते। सदाचारशब्देन दया–क्षमा–सत्य–शौच–विनय–त्याग–संयमादीन धर्मस्य दशलक्षणानि महर्षिमनुना निगदितम् —

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" ॥[4]

सदाचारोऽयं सच्चरित्रविनिर्माणे तथा च नैतिकमूल्यानां विकासे साहाय्यं करोति, अतोऽयं सर्वोत्तमं तपमिति कथ्यते। यथा मनुस्मृतौ —

"सर्वस्य तपसामूलमाचारं जगृह परम्" ॥[5]

आचारविषये निश्चितरूपेण शास्त्रप्रमाणं विद्यते यत् —

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" ॥[6]

आचारस्य महत्त्वप्रसङ्गे मनुस्मृतौ यदुक्तम् —

"आचाराद् विच्युतो विप्रो न वेदफलमश्नुते।
आचारेण तु संयुक्तः सम्पूर्णफलभागभवेत्" ॥[7]

अर्थात् आचाराद् पतितः ब्राह्मण: वेदाध्ययनस्य फलं न प्राप्नोति अपितु आचारयुक्तो ब्राह्मण: वेदाध्ययनस्य सम्पूर्णफलं प्राप्तुमर्हति। अपिच —

"आचारः परमो धर्मः श्रुत्यक्त स्मार्त एव च।
तस्मादस्मिन् सदायुक्तो नित्यं स्यादात्मवान् द्विजः" ॥[8]

आचारस्य महत्त्वप्रसङ्गे महाभारतेऽपि एवमुच्यते —

"आचाराल्लभते ह्यायुराचाराल्लभते श्रियम्।
आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च" ॥[9]

अतएव आचारपरिपालनमेव भारतीयधर्मस्य परमं वैशिष्ट्यम्। धर्मार्थकाममोक्षाख्यं चतुर्विधपुरुषार्थेषु मनुष्यजीवनस्य परमलक्ष्य: मोक्षप्राप्तिः परमानन्दप्राप्तिर्वा। एतद् परमलक्ष्यप्राप्तेः आचारः भवति प्रथमं सोपानम्। शास्त्राचारपालनं विना न कश्चित् कदापि एतद् लक्ष्यप्राप्तुं शक्यते। अतएव शास्त्राचारपालनमावश्यकम्। एवम्प्रकारेण सर्वासु स्मृतिषु, सर्वेषु धर्मसूत्रेषु च आचारविषये चर्चा प्रतिपादित मस्ति। आचारशास्त्रविषयकाः चर्चा: न केवलं वैदिकवाङ्मये अपितु लौकिकसंस्कृतसाहित्यग्रन्थेष्वपि कालिदासः, माघः, भारवेत्यादयश्च महाकवयः तेषु रचनासु तथा भासः,

कालिदासः, भवभूत्यादयः नाट्यकाराश्च तेषु रूपकेषु धर्मः, नीतिः, त्यागः, कर्तव्यश्चेत्यादिमार्गेण एषा चर्चाः कृताः सन्ति।

लौकिकसंस्कृतसाहित्यस्य विपुलवाङ्मये भारतीयसंस्कृतेः आराधकः शाश्वतसौन्दर्यस्य समर्थकः, सूक्ष्मतत्त्वानां ज्ञाता, श्रेयस्य साधकः कविकुलगुरोः कालिदासस्य स्थानमतीवमहत्त्वपूर्णम्। तस्य विरचितं रघुवंशं, कुमारसंभवं, मेघदूतं, ऋतुसंहारं, मालविकाग्निमित्रं, विक्रमोर्वशीयं, अभिज्ञान– शकुन्तलमितिश्च सप्तग्रन्थाः जनहृदये सदा विलासिताः सन्ति। महाकविकालिदासः शास्त्रविहिताचारपद्धतिं आचरणस्य महत्त्वपुर्णमङ्गमिति मन्यते। तस्यानुसारं मनुष्यस्य सर्वाङ्गीनविकासः शास्त्रानुकूलाचारपालनेनैव सम्भवति तथा शास्त्रानुकूलाचारणञ्च हि श्रेष्टफलस्य कारणम्। तस्य रचनासु सर्वत्र शास्त्रविहिताचाराणां चर्चाः दृक्गोचरी भवन्ति। अतः प्रबन्धेऽस्मिन् महाकविकालिदासस्य अनुपमसाहित्यकृतिः रघुवंशमिति ऊनविंशतिसर्गात्मके महाकाव्ये प्रतिपादिताः सामाजिक–राजनैतिक–आर्थिक–धार्मिक–नैतिकश्चेत्यादीनां आचाराणां शास्त्रीयानुशीलनं समासेन निम्ने प्रस्तूयते मया, तत्रादौ यथा —

**रघुवंशमहाकाव्ये प्रतिपादितो सामाजिकाचारः** –

मनुष्यः सामाजिकजीवः। सामाजिकाचारपद्धतिं शास्त्रानुकूलाचरणं वा मनुष्यस्य सर्वाङ्गीनविकाससाधने सहायको भवति। मनुष्यस्य सामाजिकाचारणस्य मानदण्डरूपेण श्रुतिस्मृतिविहिताचरणमेव स्वीकृतम् महाकविना। सः मनुस्मृतौ प्रतिपादितम् आचारपद्धतिं शास्त्रप्रमाणरूपेण स्वीकृतं तथा तदनुसारम् आचरणं मानवधर्मेनाभिहितम्। सामाजिकाचारस्यान्तर्गते वर्णव्यवस्था, आश्रमव्यवस्था, संस्काराः पारिवारिकसम्बन्धश्चेत्यादयः विषयाः महाकविना महाकाव्येऽस्मिन् प्रतिपादनं कृतम्। तस्यानुसारं सामाजिकाचरणशुद्धेः शास्त्रसम्मतं वर्णाश्रमधर्मपालनम् अनिवार्यम्। काव्येऽस्मिन् पञ्चमसर्गे महर्षिबाल्मीकिना साङ्गवेदस्य अध्यापनकार्यस्योल्लेखं कृतम् महाकविना —

"साङ्ग च वेदमध्याप्य किञ्चिदुत्क्रान्तशैशवौ।
स्वकृतिं गापयामास कविप्रथमपद्धतिम्"॥[10]

क्षत्रियनृपानां क्षात्रधर्मानुकूलाचरणानामुल्लेखमपि महाकविना कृतम्। प्रजानां रक्षणं, प्रजानुरञ्जनं, दानं चेत्यादि क्षत्रियनृपानां प्रमुखं कर्तव्यम्। महाकाव्येऽस्मिन् प्रथमे सर्गे राजा दीलिपेन प्रजानां रक्षणं, भरणपोषणादीनां कर्त्तव्यानाञ्च निर्वहणस्य उल्लेखं महाकविना निरूपितम् —

"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः"॥[11]

महाकाव्यस्य पञ्चमसर्गे रघोः दानशीलतायाः परिचयमपि प्राप्यते —

"गुरूप्रदेयाधिकनिसपृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च"॥[12]

महाकविकालिदासः अस्मिन् महाकाव्ये आश्रमव्यवस्थायाः आवश्यकतां स्वीकृत्वा यदुक्तम् —

"शैशवेऽभ्यस्तविद्यानां यौवने विषयेषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्"॥[13]

रघुवंशस्य राजकुमारै वाल्ये उपनयन्यन संस्कारादनन्तरं ब्रह्मचर्यव्रतपालनस्य विषयः महाकविना सपष्टितम् —

"अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरूप्रियम्"।[14]

शास्त्रानुसारं गृहस्थाश्रमप्रवेशस्य वर्णनमपि अत्र अवलोक्यते —

"अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयद् गुरुः।

नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः"॥[15]

महाकाव्येऽस्मिन् रघुवंशीयः नृपानां वृद्धावस्थायां मुनिवृत्तिधारणं कृत्वा वाणप्रस्थाश्रमप्रवेशस्य वर्णनं महाकविना सूचितम् — "- - - - वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।" [16]

अन्तिमाश्रमं तथा सन्यासाश्रमं मोक्षप्राप्तेः अतीवगुरुत्वपूर्णम्। अस्मिन् महाकाव्येऽपि महाराजरघुः सन्यासाश्रमग्रहणाद् अन्तरं नगराद् वहिः स्थित्वा जितेन्द्रियः भूत्वा मोक्षप्राप्त्यर्थं योगसाधनायां लीनमासित् इत्येवं निरुपितम् महाकविना —

"स किलाश्रममन्त्यमाश्रितो निवसन्आवसथे पुराद्बहि।

समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियश्रयाः"॥[17]

संस्कारः भवति समाजस्य संस्कृतेर्वा महत्त्वपूर्णमङ्गम्। आचारस्य मूले संस्कारः एव वर्तते। धर्मशास्त्रे क्रमशः गर्भाधानः, पुंसवनः, सीमन्तोन्नयनः, जातकर्मः, नामकरणः, निष्क्रमणः, अन्नप्राशनः, चूडाकर्मः, कर्णवेधः, विद्यारम्भः, उपनयनः, वेदारम्भ, केशान्तः, समावर्तनः, विवाहः, अन्त्येष्टिः श्चेत्यादयः षोडश संस्काराः उल्लिखिताः सन्ति। उक्तषोडशसंस्कारेषु केचन संस्काराः महाकविना महाकाव्येऽस्मिन् नामोल्लेखपूर्वकं वर्णानां कृतवान्। यथा तृतीयसर्गे राजादिलीपस्य सहधर्मीनिसुदक्षिनायाः पुंसवनसंस्कारः, रघोः जन्मादनन्तरं वशिष्ठेन सविधिपूर्वकं जातकर्मसंस्कारः, रघोः उपनयनसंस्कारः, तृतीयसर्गे रघोः चूडाकरणकर्मसंस्कारः, एकादशसर्गे विवाहसंस्कारः, अष्टमसर्गे अन्त्योष्टिसंस्कारश्चेत्यादीनां संस्कारानां प्रतिपादनं महाकविना कृतम्। महाकाव्येऽस्मिन् रघोः उपनयनसंस्कारविषये महाकविना एवमुक्तम् —

"अथोपनीतं विधिवद्विपश्चिता विनिन्युरेनं गुरवो गुरूप्रियम्।

अबन्ध्ययत्नाश्च बभूवुश्त्रतो ते क्रियाहिवस्तूपहिता प्रसीदति"॥[18]

**पारिवारिकाचारः**— पितुः आज्ञापालनं पुत्रस्य अन्यतमो प्रधानं कर्तव्यम्। महाकविनकालिदासेन एतद्विषयं महाकाव्येऽस्मिन् सम्यकतया निरुपितम् —

"तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः।

भूपतेरपि तयोः प्रवत्स्यगतोर्नमुयोरूपरि वाष्पविन्दवः"॥[19]

एवं प्रकारेण शास्त्रानुसारं विविधसामाजिकाचाराणां समुचितपालनं महाकाव्येऽस्मिन् परिलक्ष्यते।

**रघुवंशमहाकाव्ये प्रतिपादितो राजनैतिकाचारः —**

राजनैतिकाचारेषु प्रजापालनं, प्रजानुरञ्जनं, वर्णाश्रमधर्मरक्षणं च राज्ञः प्रधानं कर्त्तव्यम्। प्रजानुरञ्जनं रघुवंशीयः नृपानां एकमेव लक्ष्यम् इत्युक्तम् महाकविना। महाकाव्यस्य प्रथमे सर्गे दिलीपस्य प्रजावात्सलतायाः वर्णनायामेवमुक्तमं महाकविना —

"प्रजानां विनयाधानाद्क्षणाद्भरनादपि।

स पिता पितरस्तासां केवलं जन्महेतवः"॥[20]

नृपस्य वर्णाश्रमरक्षणमवश्यकर्तव्यरूपेण महाकविना अत्र सूचितम् —

"नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः।

निर्वासिताप्येवमत सत्वयाऽहं तपस्विसामान्यमवेक्षनीया"॥[21]

राजनैतिकाचारेषु दण्डोऽन्यतमः प्रधानश्च। यथार्हदण्ड प्रयोगेन राजा दिलीपः प्रजानां हृदयं

जितवान् इति महाकविना महाकाव्येऽस्मिन् दर्शितम् —

"न हि: सर्वस्य लोकस्य युक्त दण्डतया मनः।
आददे नातशीतोष्णो नभस्वानिव दक्षिणः" ॥[22]

महाकाव्यस्य अष्टमसर्गे देशकालानुसारं षाड्गुण्यनीतेः प्रयोगवर्णनमपि महाकविना निरूपितम् —

"पणबन्धमुखानन्गुणानजः षडुपायुक्तं तत् फलम्"।[23]

**रघुवंशमहाकाव्ये प्रतिपादितो आर्थिकाचारः —**

पुरुषार्थचतुष्टयेषु अर्थः अन्यतमोऽत्सि। समाजस्य प्रगतेः विकासस्य च मूलमन्त्रं आर्थिकसमृद्धौ भौतिकसमृद्धौ वा निहीतौ स्तः। आर्थिकसमृद्धेः प्रमुखसाधनरूपेण कृषिः, पशुपालनं, वाणिज्यमिति च उल्लिखितम्। काव्येऽस्मिन् शाली, कलमा, निवारश्चेत्यादिप्रकारेण व्रीहेः विविधप्रकारमूल्लेखं कृतम् महाकविना —

'----- आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः।[24]
'----- आपादपद्मप्रणताः कलमा इव ते रघुम्।[25]
'------ अपत्यैरिव नीवारभागधेयो चित्तैमृगैः।[26]

तस्मिन् काले गोपालनमपि प्रचलितस्म। सन्तानप्राप्तिर्हेतोः महाराजदिलीप: रानीसुदक्षिनया सह वशिष्ठेराश्रमगमनकाले पथि वयोवृद्धा आभीराः ताभ्यां गोदोहोद्भवं घृतं उपहारीकृतवन्तः। एतेन ज्ञायते यत् तस्मिन् काले जनानां मुख्यः व्यवसायः गोपालनमासित्।

**रघुवंशमहाकाव्ये प्रतिपादितो धार्मिकाचारः नैतिकाचारश्चः—**

मानजीवनस्य प्रमुखाङ्गः भवति धर्मः। मानवजीवनस्य पुरुषार्थचतुष्टयेषु धर्मः भवति प्रथम: प्रधानश्च। धर्म:

भवति भारतीयसंस्कृतेराधारः। मानवजीवनस्य परमलक्ष्य: मोक्षप्राप्तिः, एतद् मोक्षप्राप्तेः धर्मः भवति प्रमुखसाधनम्। धार्मिकक्रियानां यथावत् परिपालनेन मनुष्यः क्रमशः उन्नतिमार्गं प्रति अग्रसरं भूत्वा चरमलक्ष्यं मोक्षप्राप्तुर्महति। धार्मिकाचारेषु यज्ञः अन्यतमः प्रधानश्च। यज्ञानुष्ठानं धर्माचरणस्य प्रमुखाङ्गं वर्तते। पुत्रकामनाहेतोः पुत्रेष्टियज्ञस्य वर्णनं महाकविना काव्येऽस्मिन् कृतम् —

"ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिण:
आरेभिरे जितात्मानः पुत्रयामिष्टिमृत्विजः"।[27]

अपिच सम्राट् रघुना कृतो विश्वजितयज्ञस्य वर्णनमपि महाकविना निरूपितम्। महाकाव्यस्य द्वितीयेसर्गे सन्तानप्राप्तिर्हेतुः महाराजदिलीपस्य गोसेवारूपव्रतमपि उल्लिखितम्। तपश्चर्या तपस्वीनां जीवनचर्या: महत्वपूर्णमङ्गम्। तपस्याकाले केवलं कुशाङ्कुरं खादित्वा ऋषय: जीवन्ति स्म एवमुल्लेखमपि महाकाव्येऽस्मिन् प्राप्यते —

"पुरा स दर्भाङ्कुरमात्रवृत्तिस्वरन्मृगै: सार्धमृषिर्मघोना"।[28]

देवोपसनायाः चर्चा अपि दृश्यते। महाकाव्यस्य दशमे सर्गे विष्णोः स्तुतेरुल्लेखं प्राप्यते। महाकविना शिवस्तुतेरपि उल्लेखं महाकाव्येऽस्मिन् कृतम्।

सदाचारः तथा शिष्टाचार: मनुष्यजीवनस्य मूलाधारः भवति। परोपकारः, दयालुता, सच्चरित्रता, क्षमा, शरनागतरक्षण:, सत्यभाषण: चेत्यादय: मानवीयगुणाः नैतिकाचारस्य सदाचारस्य वा अङ्गो भवति। महाकविकालिदासेन व्यक्तेः नैतिकगुणानां विकासे सत्यभाषणं आवश्यकमिति मन्यते। यथोक्तम् –

'------ सत्याय मितभाषिनम्'।[29]

शरणागतरक्षणरूपाचरणं महापुरुषाणां नैसर्गिकस्वभावः इति मन्यते महाकविना। काव्यस्य द्वितीयेसर्गे महाराजदिलीपस्य शरणागतरक्षणरूपनैतिकाचरणं महाकविना दर्शितम् —

"ततो मृगेन्द्रस्य मृगेन्द्रगामि धाय वध्यस्य शरणं शरण्यः।
स त्वं मदीयेन शरीरवृत्तिं देहेन निवर्त्तयितुं प्रसीद"॥[30]

अपिच क्षमाशीलाचरणस्य श्रेष्ठत्वमपि प्रतिपादितम्। महाराजदिलीपः वहुशक्तिसम्पन्नं भूत्वाऽपि तस्य क्षमाशीलाचरणस्य श्रेष्ठत्वं महाकविकालिदासेन निरूपितम् —

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघा विपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव"॥[31]

एतदतिरिक्तं राजादिलीपस्य सहनशीलता, सम्राट् अजस्य विनयशीलता, महाराजदशरथस्य दयाशीलता, रघोः दानशीलता, अतिथिसत्कारश्चेत्यादीनां विविधगुणानां समावेशनं कृतं महाकविना काव्येऽस्मिन्। एवं प्रकारेण महाकविकालिदासस्य काव्येऽस्मिन् शास्त्रानुमोदितविविधाचाराणां चर्चा सर्वत्र प्रतिपदं दृश्यते।

**उपसंहारः—** निष्कर्षरूपेण एवं वक्तुं शक्यते यत्, महाकवि कालिदासेन महाकाव्येऽस्मिन् शास्त्रानुसारं येषां आचाराणां प्रतिपादनं कृतम् तेषां पालनं मानवानां कृते अत्यावश्यकम्। सदाचारपालनेन व्यक्तेः नैतिकमुल्यानां विकासः आदर्शचरित्रानाञ्च निर्माणं तथा ऐहिकं पारलौकिकञ्च अभ्युदयोऽपि भवति। आचारपालनेन न केवलं स्वस्य अपितु समाजस्य, देशस्य, राष्ट्रस्य च कल्याणं भवितुमर्हति, अतः अस्माभिः सर्वैः सदैव सदाचारपालनं कर्तुं प्रयत्नः करणीयः इति शम्।

## Endnotes

1. शब्दकल्पद्रुमः
2. वाचस्पत्यम् –पृ 631
3. मनुस्मृतिः–2/18
4. तत्रैव – 6/92
5. तत्रैव – 1/110
6. भगवद्गीता –16/24
7. मनुस्मृतिः– 1/109
8. तत्रैव– 1/108
9. महाभारते अनुशासनपर्वे –104/6
10. रघुवंशम् –15/33
11. तत्रैव –1/24
12. तत्रैव –5/31
13. तत्रैव –1/8
14. तत्रैव –3/29
15. तत्रैव –3/33
16. तत्रैव –1/8
17. तत्रैव –8/14
18. तत्रैव –3/29
19. तत्रैव –11/4
20. तत्रैव –1/24
21. तत्रैव –14/67
22. तत्रैव –4/8
23. तत्रैव –8/21
24. तत्रैव –4/20
25. तत्रैव –4/37
26. तत्रैव –1/50
27. तत्रैव –10/4
28. तत्रैव –13/39
29. तत्रैव –1/7
30. तत्रैव –2/30
31. तत्रैव – 1/22

## Bibliography


- शास्त्री, हरगोविन्दः, मनुस्मृतिः (मनिप्रभा हिन्दीटीकासहितः) चौखाम्बा संस्कृत सिरिज, 2003 (द्वितीयसंस्करणम्)
- वाहादुरः राधाकान्तः, शब्दकल्पद्रुमः, सम्पा. वरदाप्रसादवसुः, हरिचरणवसुः, वाराणसी, चौखाम्बा सुरभारती प्रकाशनम्, 2015
- उपाध्यायः, वलदेवः, धर्म और दर्शन, वनारस, श्रीलक्ष्मीनारायण प्रेस, 1945
- डः प्रतिभा रानी, वैदिक संहिताओं में आचारमीमांसा, दिल्ली, परिमल पाब्लिकेशान, 1989
- वन्दोपाध्यायः धीरेन्द्रनाथः, संस्कृतसाहित्यस्य इतिहासः, कलिकाता, पश्चिमबङ्गराज्युस्तकपर्षदः, 2012(द्वितीय संस्करणम)
- भट्टाचार्यः, तारानाथः, वाचस्पत्यम्, सम्पा. गजपतिराजः, वाराणसी, चौखाम्बा संस्कृत सिरिज अफिस, 1962
- डॉ. कृष्णमणि त्रिपाठी, रघुवंशम्, चौखाम्बा सुरभारती प्रकाशनम्, वाराणसी, 2018